# শ্রীপুরুষোত্তমসহস্রনামস্তোত্রম্

{॥ শ্রীপুরুষোত্তমসহস্রনামস্তোত্রম্ ॥}

পুরাণপুরুষো বিষ্ণুঃ পুরুষোত্তম উচ্যতে ।

নাম্নাং সহস্রং বক্ষ্যামি তস্য ভাগবতোদ্ধৃতম্ ॥ ১॥

যস্য প্রসাদাদ্বাগীশাঃ প্রজেশা বিভবোন্নতাঃ ।

ক্ষুদ্রা অপি ভবন্ত্যাশু শ্রীকৃষ্ণং তং নতোঽস্ম্যহম্ ॥ ২॥

অনন্তা এব কৃষ্ণস্য লীলা নামপ্রবর্তিকাঃ ।

উক্তা ভাগবতে গূহাঃ প্রকটা অপি কুত্রচিত্ ॥ ৩॥

অতস্তানি প্রবক্ষ্যামি নামানি মুরবৈরিণঃ ।

সহস্রং যৈস্তু পঠিতৈঃ পঠিতং স্যাচ্ছুকামৃতম্ ॥ ৪॥

কৃষ্ণনামসহস্রস্য ঋষিরগ্নির্নিরূপিতঃ ।

গায়ত্রী চ তথা ছন্দো দেবতা পুরুষোত্তমঃ ॥ ৫॥

বিনিযোগঃ সমস্তেষু পুরুষার্থেষু বৈ মতঃ ।

বীজং ভক্তপ্রিয়ঃ শক্তিঃ সত্যবাগুচ্যতে হরিঃ ॥ ৬॥

ভক্তোদ্ধরণযত্নস্তু মন্ত্রোঽত্র পরমো মতঃ ।

Stotram Digitalized By Sanskritdocuments.org

অবতারিতভক্তাংশঃ কীলকং পরিকীর্তিতম্ ॥ ৭॥

অস্ত্রং সর্বসমর্থশ্চ গোবিন্দঃ কবচং মতম্ ।

পুরুষো ধ্যানমত্রোক্তঃ সিদ্ধিঃ শরণসংস্মৃতিঃ ॥ ৮॥

১ প্রথমস্কন্ধনামানি অধিকারলীলা

শ্রীকৃষ্ণঃ সচ্চিদানন্দো নিত্যলীলাবিনোদকৃত্ ।

সর্বাগমবিনোদী চ লক্ষ্মীশঃ পুরুষোত্তমঃ ॥ ৯॥

আদিকালঃ সর্বকালঃ কালাত্মা মাযযাবৃতঃ ।

ভক্তোদ্ধারপ্রযত্নাত্মা জগৎকর্তা জগন্ময়ঃ ॥ ১০॥

নামলীলাপরো বিষ্ণুর্ব্যাসাত্মা শুকমোক্ষদঃ ।

ব্যাপিবৈকুণ্ঠদাতা চ শ্রীমদ্ভাগবতাগমঃ ॥ ১১॥

শুকবাগমৃতাব্ধীন্দুঃ শৌনকাদ্যখিলেষ্টদঃ ।

ভক্তিপ্রবর্তকস্ত্রাতা ব্যাসচিন্তাবিনাশকঃ ॥ ১২॥

সর্বসিদ্ধান্তবাগাত্মা নারদাদ্যখিলেষ্টদঃ ।

অন্তরাত্মা ধ্যানগম্যো ভক্তিরত্নপ্রদাযকঃ ॥ ১৩॥

মুক্তোপসৃপ্যঃ পূর্ণাত্মা মুক্তানাং রতিবর্ধনঃ ।

ভক্তকার্যৈকনিরতো দ্রৌণ্যস্ত্রবিনিবারকঃ ॥ ১৪॥

ভক্তস্ময়প্রণেতা চ ভক্তবাক্পরিপালকঃ ।

ব্রহ্মণ্যদেবো ধর্মাত্মা ভক্তানাং চ পরীক্ষকঃ ॥ ১৫॥

আসন্নহিতকর্তা চ মায়াহিতকরঃ প্রভুঃ ।

উত্তরাপ্রাণদাতা চ ব্রহ্মাস্ত্রবিনিবারকঃ ॥ ১৬॥

সর্বতঃ পাণ্ডবপতিঃ পরীক্ষিচ্ছুদ্ধিকারণম্ ।

গূহাত্মা সর্ববেদেষু ভক্তৈকহৃদয়ঙ্গমঃ ॥ ১৭॥

কুন্তীস্তুত্যঃ প্রসন্নাত্মা পরমাদ্ভুতকার্যকৃত্ ।

ভীষ্মমুক্তিপ্রদঃ স্বামী ভক্তমোহনিবারকঃ ॥ ১৮॥

সর্বাবস্থাসু সংসেব্যঃ সমঃ সুখহিতপ্রদঃ ।

কৃতকৃত্যঃ সর্বসাক্ষী ভক্তস্ত্রীরতিবর্ধনঃ ॥ ১৯॥

সর্বসৌভাগ্যনিলয়ঃ পরমাশ্চর্যরূপধৃক্ ।

অনন্যপুরুষস্বামী দ্বারকাভাগ্যভাজনম্ ॥ ২০॥

বীজসংস্কারকর্তা চ পরীক্ষিজ্জ্ঞানপোষকঃ ।

সর্বত্রপূর্ণগুণকঃ সর্বভূষণভূষিতঃ ॥ ২১॥

সর্বলক্ষণদাতা চ ধৃতরাষ্ট্রবিমুক্তিদঃ ।

সন্মার্গরক্ষকো নিত্যং বিদুরপ্রীতিপূরকঃ ॥ ২২॥

লীলাব্যামোহকর্তা চ কালধর্মপ্রবর্তকঃ ।

পাণ্ডবানাং মোক্ষদাতা পরীক্ষিদ্ভাগ্যবর্ধনঃ ॥ ২৩॥

কলিনিগ্রহকর্তা চ ধর্মাদীনাং চ পোষকঃ ।

সৎসঙ্গজ্ঞানহেতুশ্চ শ্রীভাগবতকারণম্ ॥ ২৪॥

প্রাকৃতাদৃষ্টমার্গশ্চ॥॥॥॥॥। continued

২ দ্বিতীয়স্কন্ধনামানি জ্ঞান-সাধন-লীলা

॥॥॥॥॥॥॥॥॥॥॥॥॥॥॥॥॥॥।শ্রোতব্যঃ সকলাগমৈঃ ।

কীর্তিতব্যঃ শুদ্ধভাবৈঃ স্মর্তব্যশ্চাত্মবিত্তমৈঃ ॥ ২৫॥

অনেকমার্গকর্তা চ নানাবিধগতিপ্রদঃ ।

পুরুষঃ সকলাধারঃ সত্ত্বৈকনিলযাত্মভূঃ ॥ ২৬॥

সর্বধ্যেযো যোগগম্যো ভক্ত্যা গ্রাহ্যঃ সুরপ্রিযঃ ।

জন্মাদিসার্থককৃতির্লীলাকর্তা পতিঃ সতাম্ ॥ ২৭॥

আদিকর্তা তত্ত্বকর্তা সর্বকর্তা বিশারদঃ ।

নানাবতারকর্তা চ ব্রহ্মাবির্ভাবকারণম্ ॥ ২৮॥

দশলীলাবিনোদী চ নানাসৃষ্টিপ্রবর্তকঃ ।

অনেককল্পকর্তা চ সর্বদোষবিবর্জিতঃ ॥ ২৯॥

৩ তৃতীয়স্কন্ধনামানি সর্গলীলা

বৈরাগ্যহেতুস্তীর্থাত্মা সর্বতীর্থফলপ্রদঃ ।

তীর্থশুদ্ধৈকনিলয়ঃ স্বমার্গপরিপোষকঃ ॥ ৩০॥

তীর্থকীর্তির্ভক্তগম্যো ভক্তানুশয়কার্যকৃত্ ।

ভক্ততুল্যঃ সর্বতুল্যঃ স্বেচ্ছাসর্বপ্রবর্তকঃ ॥ ৩১॥

গুণাতীতোঽনবদ্যাত্মা সর্গলীলাপ্রবর্তকঃ ।

সাক্ষাৎসর্বজগৎকর্তা মহদাদিপ্রবর্তকঃ ॥ ৩২॥

মায়াপ্রবর্তকঃ সাক্ষী মায়ারতিবিবর্ধনঃ ।

আকাশাত্মা চতুর্মূর্তিশ্চতুর্ধা ভূতভাবনঃ ॥ ৩৩॥

রজঃপ্রবর্তকো ব্রহ্মা মরীচ্যাদিপিতামহঃ ।

বেদকর্তা যজ্ঞকর্তা সর্বকর্তাঽমিতাত্মকঃ ॥ ৩৪॥

অনেকসৃষ্টিকর্তা চ দশধাসৃষ্টিকারকঃ ।

যজ্ঞাঙ্গো যজ্ঞবারাহো ভূধরো ভূমিপালকঃ ॥ ৩৫॥

সেতুর্বিধরণো জৈত্রো হিরণ্যাক্ষান্তকঃ সুরঃ ।

দিতিকশ্যপকামৈকহেতুসৃষ্টিপ্রবর্তকঃ ॥ ৩৬॥

দেবাভয়প্রদাতা চ বৈকুণ্ঠাধিপতির্মহান্ ।

সর্বগর্বপ্রহারী চ সনকাদ্যখিলার্থদঃ ॥ ৩৭॥

সর্বাশ্বাসনকর্তা চ ভক্ততুল্যাহবপ্রদঃ ।

কাললক্ষণহেতুশ্চ সর্বার্থজ্ঞাপকঃ পরঃ ॥ ৩৮॥

ভক্তোন্নতিকরঃ সর্বপ্রকারসুখদায়কঃ ।

নানাযুদ্ধপ্রহরণো ব্রহ্মশাপবিমোচকঃ ॥ ৩৯॥

পুষ্টিসর্গপ্রণেতা চ গুণসৃষ্টিপ্রবর্তকঃ ।

কর্দমেষ্টপ্রদাতা চ দেবহূত্যখিলার্থদঃ ॥ ৪০॥

শুক্লনারায়ণঃ সত্যকালধর্মপ্রবর্তকঃ ।

জ্ঞানাবতারঃ শান্তাত্মা কপিলঃ কালনাশকঃ ॥ ৪১॥

ত্রিগুণাধিপতিঃ সাঙ্খ্যশাস্ত্রকর্তা বিশারদঃ ।

সর্গদূষণহারী চ পুষ্টিমোক্ষপ্রবর্তকঃ ॥ ৪২॥

লৌকিকানন্দদাতা চ ব্রহ্মানন্দপ্রবর্তকঃ ।

ভক্তিসিদ্ধান্তবক্তা চ সগুণজ্ঞানদীপকঃ ॥ ৪৩॥

আত্মপ্রদঃ পূর্ণকামো যোগাত্মা যোগভাবিতঃ ।

জীবন্মুক্তিপ্রদঃ শ্রীমাননন্যভক্তিপ্রবর্তকঃ ॥ ৪৪॥

কালসামর্থ্যদাতা চ কালদোষনিবারকঃ ।

গর্ভোত্তমজ্ঞানদাতা কর্মমার্গনিযামকঃ ॥ ৪৫॥

সর্বমার্গনিরাকর্তা ভক্তিমার্গৈকপোষকঃ ।

সিদ্ধিহেতুঃ সর্বহেতুঃ সর্বাশ্চর্যৈককারণম্ ॥ ৪৬॥

চেতনাচেতনপতিঃ সমুদ্রপরিপূজিতঃ ।

সাঙ্খ্যাচার্যস্তুতঃ সিদ্ধপূজিতঃ সর্বপূজিতঃ ॥ ৪৭॥

৪ চতুর্থস্কন্ধনামানি বিসর্গলীলা

বিসর্গকর্তা সর্বেশঃ কোটিসূর্যসমপ্রভঃ ।

অনন্তগুণগম্ভীরো মহাপুরুষপূজিতঃ ॥ ৪৮॥

অনন্তসুখদাতা চ ব্রহ্মকোটিপ্রজাপতিঃ ।

সুধাকোটিস্বাস্থ্যহেতুঃ কামধুক্কোটিকামদঃ ॥ ৪৯॥

সমুদ্রকোটিগম্ভীরস্তীর্থকোটিসমাহ্বয়ঃ ।

সুমেরুকোটিনিষ্কম্পঃ কোটিব্রহ্মাণ্ডবিগ্রহঃ ॥ ৫০॥

কোট্যশ্বমেধপাপঘ্নো বাযুকোটিমহাবলঃ ।

কোটীন্দুজগদানন্দী শিবকোটিপ্রসাদকৃত্ ॥ ৫১॥

সর্বসদ্গুণমাহাত্ম্যঃ সর্বসদ্গুণভাজনম্ ।

মন্বাদিপ্রেরকো ধর্মো যজ্ঞনারাযণঃ পরঃ ॥ ৫২॥

আকূতিসূনুর্দেবেন্দ্রো রুচিজন্মাঽভযপ্রদঃ ।

দক্ষিণাপতিরোজস্বী ক্রিযাশক্তিঃ পরাযণঃ ॥ ৫৩॥

দত্তাত্রেযো যোগপতির্যোগমার্গপ্রবর্তকঃ ।

অনসূযাগর্ভরত্নমৃষিবংশবিবর্ধনঃ ॥ ৫৪॥

গুণত্রযবিভাগজ্ঞশ্চতুর্বর্গবিশারদঃ ।

নারাযণো ধর্মসূনুর্মূর্তিপুণ্যযশস্করঃ ॥ ৫৫॥

সহস্রকবচচ্ছেদী তপঃসারো নরপ্রিযঃ ।

বিশ্বানন্দপ্রদঃ কর্মসাক্ষী ভারতপূজিতঃ ॥ ৫৬॥

অনন্তাদ্ভুতমাহাত্ম্যো বদরীস্থানভূষণম্ ।
জিতকামো জিতক্রোধো জিতসঙ্গো জিতেন্দ্রিয়ঃ ॥ ৫৭॥

উর্বশীপ্রভবঃ স্বর্গসুখদায়ী স্থিতিপ্রদঃ ।
অমানী মানদো গোপ্তা ভগবচ্ছাস্ত্রবোধকঃ ॥ ৫৮॥

ব্রহ্মাদিবন্দ্যো হংসশ্রীর্মায়াবৈভবকারণম্ ।
বিবিধানন্তসর্গাত্মা বিশ্বপূরণতৎপরঃ ॥ ৫৯॥

যজ্ঞজীবনহেতুশ্চ যজ্ঞস্বামীষ্টবোধকঃ ।
নানাসিদ্ধান্তগম্যশ্চ সপ্ততন্তুশ্চ ষড্গুণঃ ॥ ৬০॥

প্রতিসর্গজগৎকর্তা নানালীলাবিশারদঃ ।
ধ্রুবপ্রিয়ো ধ্রুবস্বামী চিন্তিতাধিকদায়কঃ ॥ ৬১॥

দুর্লভানন্তফলদো দয়ানিধিরমিত্রহা ।
অঙ্গস্বামী কৃপাসারো বৈন্যো ভূমিনিয়ামকঃ ॥ ৬২॥

ভূমিদোগ্ধা প্রজাপ্রাণপালনৈকপরায়ণঃ ।
যশোদাতা জ্ঞানদাতা সর্বধর্মপ্রদর্শকঃ ॥ ৬৩॥

***Stotram Digitalized By Sanskritdocuments.org***

পুরঞ্জনো জগন্মিত্রং বিসর্গান্তপ্রদর্শকঃ ।

প্রচেতসাং পতিশ্চিত্রভক্তিহেতুর্জনার্দনঃ ॥ ৬৪॥

স্মৃতিহেতুব্রহ্মভাবসাযুজ্যাদিপ্রদঃ শুভঃ ।

বিজযী ॥॥॥॥॥॥॥॥॥॥॥॥॥॥॥॥॥॥॥॥॥॥॥॥॥॥॥ continued

৫ পঞ্চমস্কন্ধনামানি স্থানলীলা

॥॥॥॥॥॥॥স্থিতিলীলাব্ধিরচ্যুতো বিজযপ্রদঃ ॥ ৬৫॥

স্বসামর্থ্যপ্রদো ভক্তকীর্তিহেতুরধোক্ষজঃ ।

প্রিযব্রতপ্রিযস্বামী স্বেচ্ছাবাদবিশারদঃ ॥ ৬৬॥

সঙ্খ্যাগম্যঃ স্বপ্রকাশঃ সর্বসঙ্গবিবর্জিতঃ ।

ইচ্ছাযাং চ সমর্যাদস্ত্যাগমাত্রোপলম্ভনঃ ॥ ৬৭॥

অচিন্ত্যকার্যকর্তা চ তর্কাগোচরকার্যকৃত্ ।

শৃঙ্গাররসমর্যাদা আগ্নীধ্ররসভাজনম্ ॥ ৬৮॥

নাভীষ্টপূরকঃ কর্মমর্যাদাদর্শনোৎসুকঃ ।

সর্বরূপোঽদ্ভুততমো মর্যাদাপুরুষোত্তমঃ ॥ ৬৯॥

সর্বরূপেষু সত্যাত্মা কালসাক্ষী শশিপ্রভঃ ।

মেরুদেবীব্রতফলমৃষভো ভগলক্ষণঃ ॥ ৭০॥

জগৎসন্তর্পকো মেঘরূপী দেবেন্দ্রদর্পহা ।
জয়ন্তীপতিরত্যন্তপ্রমাণাশেষলৌকিকঃ ॥ ৭১॥

শতধান্যস্তভূতাত্মা শতানন্দো গুণপ্রসূঃ ।
বৈষ্ণবোৎপাদনপরঃ সর্বধর্মোপদেশকঃ ॥ ৭২ ॥

পরহংসক্রিয়াগোপ্তা যোগচর্যাপ্রদর্শকঃ ।
চতুর্থাশ্রমনির্ণেতা সদানন্দশরীরবান্ ॥ ৭৩॥

প্রদর্শিতান্যধর্মশ্চ ভরতস্বাম্যপারকৃত্ ।
যথাবৎকর্মকর্তা চ সঙ্গানিষ্টপ্রদর্শকঃ ॥ ৭৪ ॥

আবশ্যকপুনর্জন্মকর্মমার্গপ্রদর্শকঃ ।
যজ্ঞরূপমৃগঃ শান্তঃ সহিষ্ণুঃ সৎপরাক্রমঃ ॥ ৭৫॥

রহূগণগতিজ্ঞশ্চ রহূগণবিমোচকঃ ।
ভবাটবীতত্ত্ববক্তা বহির্মুখহিতে রতঃ ॥ ৭৬॥

গয়স্বামী স্থানবংশকর্তা স্থানবিভেদকৃত্ ।
পুরুষাবয়বো ভূমিবিশেষবিনিরূপকঃ ॥ ৭৭॥

জম্বূদ্বীপপতির্মেরুনাভিপদ্মরুহাশ্রয়ঃ ।

নানাবিভূতিলীলাঢ্যো গঙ্গোৎপত্তিনিদানকৃত্ ॥ ৭৮॥

গঙ্গামাহাত্ম্যহেতুশ্চ গঙ্গারূপোঽতিগূঢকৃত্ ।
বৈকুণ্ঠদেহহেত্বম্বুজন্মকৃত্ সর্বপাবনঃ ॥ ৭৯॥

শিবস্বামী শিবোপাস্যো গূঢঃ সঙ্কর্ষণাত্মকঃ ।
স্থানরক্ষার্থমৎস্যাদিরূপঃ সর্বৈকপূজিতঃ ॥ ৮০॥

উপাস্যনানারূপাত্মা জ্যোতীরূপো গতিপ্রদঃ ।
সূর্যনারাযণো বেদকান্তিরুজ্জ্বলবেষধৃক্ ॥ ৮১॥

হংসোঽন্তরিক্ষগমনঃ সর্বপ্রসবকারণম্ ।
আনন্দকর্তা বসুদো বুধো বাক্পতিরুজ্জ্বলঃ ॥ ৮২॥

কালাত্মা কালকালশ্চ কালচ্ছেদকৃদুত্তমঃ ।
শিশুমারঃ সর্বমূর্তিরাধিদৈবিকরূপধৃক্ ॥ ৮৩॥

অনন্তসুখভোগাঢ্যো বিবরৈশ্বর্যভাজনম্ ।
সঙ্কর্ষণো দৈত্যপতিঃ সর্বাধারো বৃহদ্বপুঃ ॥ ৮৪॥

অনন্তনরকচ্ছেদী স্মৃতিমাত্রার্তিনাশনঃ ।
সর্বানুগ্রহকর্তা চ ॥॥॥॥॥॥॥॥॥॥॥॥॥ continued

॥॥॥॥॥॥॥মর্যাদাভিন্নশাস্ত্রকৃত্ ॥ ৮৫ ॥

কালান্তকভযচ্ছেদী নামসামর্থ্যরূপধৃক্ ।

উদ্ধারানর্হগোপ্তাত্মা নামাদিপ্রেরকোত্তমঃ ॥ ৮৬॥

অজামিলমহাদুষ্টমোচকোঽঘবিমোচকঃ ।

ধর্মবক্তাঽক্লিষ্টবক্তা বিষ্ণুধর্মস্বরূপধৃক্ ॥ ৮৭॥

সন্মার্গপ্রেরকো ধর্তা ত্যাগহেতুরধোক্ষজঃ ।

বৈকুণ্ঠপুরনেতা চ দাসসংবৃদ্ধিকারকঃ ॥ ৮৮॥

দক্ষপ্রসাদকৃদ্ধংসগুহ্যস্তুতিবিভাবনঃ ।

স্বাভিপ্রাযপ্রবক্তা চ মুক্তজীবপ্রসূতিকৃত্ ॥ ৮৯॥

নারদপ্রেরণাত্মা চ হর্যশ্বব্রহ্মভাবনঃ ।

শবলাশ্বহিতো গূঢবাক্যার্থজ্ঞাপনক্ষমঃ ॥ ৯০॥

গূঢার্থজ্ঞাপনঃ সর্বমোক্ষানন্দপ্রতিষ্ঠিতঃ ।

পুষ্টিপ্ররোহহেতুশ্চ দাসৈকজ্ঞাতহৃদ্গতঃ ॥ ৯১॥

শান্তিকর্তা সুহিতকৃত্ স্ত্রীপ্রসূঃ সর্বকামধুক্ ।

পুষ্টিবংশপ্রণেতা চ বিশ্বরূপেষ্টদেবতা ॥ ৯২॥

Stotram Digitalized By Sanskritdocuments.org

কবচাত্মা পালনাত্মা বর্মোপচিতিকারণম্ ।
বিশ্বরূপশিরশ্ছেদী ত্বাষ্ট্রযজ্ঞবিনাশকঃ ॥ ৯৩॥

বৃত্রস্বামী বৃত্রগম্যো বৃত্রব্রতপরায়ণঃ ।
বৃত্রকীর্তির্বৃত্রমোক্ষো মঘবৎপ্রাণরক্ষকঃ ॥ ৯৪ ॥

অশ্বমেধহবির্ভোক্তা দেবেন্দ্রামীবনাশকঃ ।
সংসারমোচকশ্চিত্রকেতুবোধনতৎপরঃ ॥ ৯৫ ॥

মন্ত্রসিদ্ধিঃ সিদ্ধিহেতুঃ সুসিদ্ধিফলদায়কঃ ।
মহাদেবতিরস্কর্তা ভক্ত্যৈ পূর্বার্থনাশকঃ ॥ ৯৬॥

দেবব্রাহ্মণবিদ্বেষবৈমুখ্যজ্ঞাপকঃ শিবঃ ।
আদিত্যো দৈত্যরাজশ্চ মহৎপতিরচিন্ত্যকৃত্ ॥ ৯৭॥

মরুতাং ভেদকস্ত্রাতা ব্রতাত্মা পুম্প্রসূতিকৃত্ ।

৭ সপ্তমস্কন্ধনামানি ঊতিলীলা
কর্মাত্মা বাসনাত্মা চ ঊতিলীলাপরায়ণঃ ॥ ৯৮॥

সমদৈত্যসুরঃ স্বাত্মা বৈষম্যজ্ঞানসংশ্রয়ঃ ।
দেহাদ্যুপাধিরহিতঃ সর্বজ্ঞঃ সর্বহেতুবিদ্ ॥ ৯৯॥

ব্রহ্মবাকস্থাপনপরঃ স্বজন্মাবধিকার্যকৃত্ ।

সদসদ্বাসনাহেতুস্ত্রিসত্যো ভক্তমোচকঃ ॥ ১০০॥

হিরণ্যকশিপুদ্বেষী প্রবিষ্টাত্মাঽতিভীষণঃ ।

শান্তিজ্ঞানাদিহেতুশ্চ প্রহ্লাদোৎপত্তিকারণম্ ॥ ১০১॥

দৈত্যসিদ্ধান্তসদ্বক্তা তপঃসার উদারধীঃ ।

দৈত্যহেতুপ্রকটনো ভক্তিচিহ্নপ্রকাশকঃ ॥ ১০২॥

সদ্দ্বেষহেতুঃ সদ্দ্বেষবাসনাত্মা নিরন্তরঃ ।

নৈষ্ঠুর্যসীমা প্রহ্লাদবৎসলঃ সঙ্গদোষহা ॥ ১০৩॥

মহানুভাবঃ সাকারঃ সর্বাকারঃ প্রমাণভূঃ ।

স্তম্ভপ্রসূতির্নৃহরির্নৃসিংহো ভীমবিক্রমঃ ॥ ১০৪॥

বিকটাস্যো ললজ্জিহ্বো নখশস্ত্রো জবোৎকটঃ ।

হিরণ্যকশিপুচ্ছেদী ক্রূরদৈত্যনিবারকঃ ॥ ১০৫॥

সিংহাসনস্থঃ ক্রোধাত্মা লক্ষ্মীভযবিবর্ধনঃ ।

ব্রহ্মাদ্যত্যন্তভযভূরপূর্বাচিন্ত্যরূপধৃক্ ॥ ১০৬॥

ভক্তৈকশান্তহৃদযো ভক্তস্তুত্যঃ স্তুতিপ্রিযঃ ।

ভক্তাঙ্গলেহনোদ্ধূতক্রোধপুঞ্জঃ প্রশান্তধীঃ ॥ ১০৭॥

স্মৃতিমাত্রভযত্রাতা ব্রহ্মবুদ্ধিপ্রদাযকঃ ।

গোরূপধার্যমৃতপাঃ শিবকীর্তিবিবর্ধনঃ ॥ ১০৮॥

ধর্মাত্মা সর্বকর্মাত্মা বিশেষাত্মাঽঽশ্রমপ্রভুঃ ।

সংসারমগ্নস্বোদ্ধর্তা সন্মার্গাখিলতত্ত্ববাক্ ॥ ১০৯॥

আচারাত্মা সদাচারঃ ॥॥॥॥॥॥॥॥॥ continued

৮ অষ্টমস্কন্ধনামানি মন্বন্তরলীলা

॥॥॥॥॥॥॥॥॥মন্বন্তরবিভাবনঃ ।

স্মৃত্যাঽশেষাশুভহরো গজেন্দ্রস্মৃতিকারণম্ ॥ ১১০॥

জাতিস্মরণহেত্বৈকপূজাভক্তিস্বরূপদঃ ।

যজ্ঞো ভযান্মনুত্রাতা বিভুর্ব্রহ্মব্রতাশ্রযঃ ॥ ১১১॥

সত্যসেনো দুষ্টঘাতী হরির্গজবিমোচকঃ ।

বৈকুণ্ঠো লোককর্তা চ অজিতোঽমৃতকারণম্ ॥ ১১২॥

উরুক্রমো ভূমিহর্তা সার্বভৌমো বলিপ্রিযঃ ।

বিভুঃ সর্বহিতৈকাত্মা বিষ্বক্সেনঃ শিবপ্রিযঃ ॥ ১১৩॥

ধর্মসেতুর্লোকধৃতিঃ সুধামান্তরপালকঃ ।

উপহর্তা যোগপতির্বৃহদ্ভানুঃ ক্রিয়াপতিঃ ॥ ১১৪॥

চতুর্দশপ্রমাণাত্মা ধর্মো মন্বাদিবোধকঃ ।

লক্ষ্মীভোগৈকনিলযো দেবমন্ত্রপ্রদাযকঃ ॥ ১১৫॥

দৈত্যব্যামোহকঃ সাক্ষাদ্গরুডস্কন্ধসংশ্রযঃ ।

লীলামন্দরধারী চ দৈত্যবাসুকিপূজিতঃ ॥ ১১৬॥

সমুদ্রোন্মথনাযত্তোঽবিঘ্নকর্তা স্ববাক্যকৃত্ ।

আদিকূর্মঃ পবিত্রাত্মা মন্দরাঘর্ষণোৎসুকঃ ॥ ১১৭॥

শ্বাসৈজদব্ধিবার্বীচিঃ কল্পান্তাবধিকার্যকৃত্ ।

চতুর্দশমহারত্নো লক্ষ্মীসৌভাগ্যবর্ধনঃ ॥ ১১৮॥

ধন্বন্তরিঃ সুধাহস্তো যজ্ঞভোক্তাঽঽর্তিনাশনঃ ।

আযুর্বেদপ্রণেতা চ দেবদৈত্যাখিলার্চিতঃ ॥ ১১৯॥

বুদ্ধিব্যামোহকো দেবকার্যসাধনতৎপরঃ ।

স্ত্রীরূপো মাযযা বক্তা দৈত্যান্তঃকরণপ্রিযঃ ॥ ১২০॥

পাযিতামৃতদেবাংশো যুদ্ধহেতুস্মৃতিপ্রদঃ ।

সুমালিমালিবধকৃন্মাল্যবৎপ্রাণহারকঃ ॥ ১২১॥

কালনেমিশিরশ্ছেদী দৈত্যযজ্ঞবিনাশকঃ ।
ইন্দ্রসামর্থ্যদাতা চ দৈত্যশেষস্থিতিপ্রিযঃ ॥ ১২২॥

শিবব্যামোহকো মাযী ভৃগুমন্ত্রস্বশক্তিদঃ ।
বলিজীবনকর্তা চ স্বর্গহেতুর্ব্রতার্চিতঃ ॥ ১২৩॥

অদিত্যানন্দকর্তা চ কশ্যপাদিতিসম্ভবঃ ।
উপেন্দ্র ইন্দ্রাবরজো বামনব্রহ্মরূপধৃক্ ॥ ১২৪॥

ব্রহ্মাদিসেবিতবপুর্যজ্ঞপাবনতৎপরঃ ।
যাচ্ঞোপদেশকর্তা চ জ্ঞাপিতাশেষসংস্থিতিঃ ॥ ১২৫॥

সত্যার্থপ্রেরকঃ সর্বহর্তা গর্ববিনাশকঃ ।
ত্রিবিক্রমস্ত্রিলোকাত্মা বিশ্বমূর্তিঃ পৃথুশ্রবাঃ ॥ ১২৬॥

পাশবদ্ধবলিঃ সর্বদৈত্যপক্ষোপমর্দকঃ ।
সুতলস্থাপিতবলিঃ স্বর্গাধিকসুখপ্রদঃ ॥ ১২৭॥

কর্মসম্পূর্তিকর্তা চ স্বর্গসংস্থাপিতামরঃ ।
জ্ঞাতত্রিবিধধর্মাত্মা মহামীনোঽব্ধিসংশ্রযঃ ॥ ১২৮॥

সত্যব্রতপ্রিযো গোপ্তা মৎস্যমূর্তিধৃতশ্রুতিঃ ।

শৃঙ্গবদ্ধধৃতক্ষোণিঃ সর্বার্থজ্ঞাপকো গুরুঃ ॥ ১২৯॥

৯ নবমস্কন্ধনামানি ঈশানুকথালীলা

ঈশসেবকলীলাত্মা সূর্যবংশপ্রবর্তকঃ ।

সোমবংশোদ্ভবকরো মনুপুত্রগতিপ্রদঃ ॥ ১৩০॥

অম্বরীষপ্রিযঃ সাধুর্দুর্বাসোগর্বনাশকঃ ।

ব্রহ্মশাপোপসংহর্তা ভক্তকীর্তিবিবর্ধনঃ ॥ ১৩১॥

ইক্ষ্বাকুবংশজনকঃ সগরাদ্যখিলার্থদঃ ।

ভগীরথমহাযত্নো গঙ্গাধৌতাঙ্ঘ্রিপঙ্কজঃ ॥ ১৩২॥

ব্রহ্মস্বামী শিবস্বামী সগরাত্মজমুক্তিদঃ ।

খট্বাঙ্গমোক্ষহেতুশ্চ রঘুবংশবিবর্ধনঃ ॥ ১৩৩॥

রঘুনাথো রামচন্দ্রো রামভদ্রো রঘুপ্রিযঃ ।

অনন্তকীর্তিঃ পুণ্যাত্মা পুণ্যশ্লোকৈকভাস্করঃ ॥ ১৩৪॥

কোশলেন্দ্রঃ প্রমাণাত্মা সেব্যো দশরথাত্মজঃ ।

লক্ষ্মণো ভরতশ্চৈব শত্রুঘ্নো ব্যূহবিগ্রহঃ ॥ ১৩৫॥

বিশ্বামিত্রপ্রিয়ো দান্তস্তাডকাবধমোক্ষদঃ ।

বায়ব্যাস্ত্রাব্ধিনিক্ষিপ্তমারীচশ্চ সুবাহুহা ॥ ১৩৬॥

বৃষধ্বজধনুর্ভঙ্গপ্রাপ্তসীতামহোৎসবঃ ।

সীতাপতির্ভৃগুপতিগর্বপর্বতনাশকঃ ॥ ১৩৭॥

অযোধ্যাস্থমহাভোগযুক্তলক্ষ্মীবিনোদবান্ ।

কৈকেযীবাক্যকর্তা চ পিতৃবাক্পরিপালকঃ ॥ ১৩৮॥

বৈরাগ্যবোধকোঽনন্যসাত্ত্বিকস্থানবোধকঃ ।

অহল্যাদুঃখহারী চ গুহস্বামী সলক্ষ্মণঃ ॥ ১৩৯॥

চিত্রকূটপ্রিযস্থানো দণ্ডকারণ্যপাবনঃ ।

শরভঙ্গসুতীক্ষ্ণাদিপূজিতোঽগস্ত্যভাগ্যভূঃ ॥ ১৪০॥

ঋষিসম্প্রার্থিতকৃতির্বিরাধবধপণ্ডিতঃ ।

ছিন্নশূর্পণখানাসঃ খরদূষণঘাতকঃ ॥ ১৪১॥

একবাণহতানেকসহস্রবলরাক্ষসঃ ।

মারীচঘাতী নিযতসীতাসম্বন্ধশোভিতঃ ॥ ১৪২॥

সীতাবিযোগনাট্যশ্চ জটাযুর্বধমোক্ষদঃ ।

শবরীপূজিতো ভক্তহনুমৎপ্রমুখাবৃতঃ ॥ ১৪৩॥

দুন্দুভ্যস্থিপ্রহরণঃ সপ্ততালবিভেদনঃ ।
সুগ্রীবরাজ্যদো বালিঘাতী সাগরশোষণঃ ॥ ১৪৪॥

সেতুবন্ধনকর্তা চ বিভীষণহিতপ্রদঃ ।
রাবণাদিশিরশ্ছেদী রাক্ষসাঘৌঘনাশকঃ ॥ ১৪৫॥

সীতাঽভয়প্রদাতা চ পুষ্পকাগমনোৎসুকঃ ।
অযোধ্যাপতিরত্যন্তসর্বলোকসুখপ্রদঃ ॥ ১৪৬॥

মথুরাপুরনির্মাতা সুকৃতজ্ঞস্বরূপদঃ ।
জনকজ্ঞানগম্যশ্চ ঐলান্তপ্রকটশ্রুতিঃ ॥ ১৪৭॥

হৈহযান্তকরো রামো দুষ্টক্ষত্রবিনাশকঃ ।
সোমবংশহিতৈকাত্মা যদুবংশবিবর্ধনঃ ॥ ১৪৮॥

১০ দশমস্কন্ধপূর্বার্ধনামানি নিরোধলীলা

পরব্রহ্মাবতরণঃ কেশবঃ ক্লেশনাশনঃ ।
ভূমিভারাবতরণো ভক্তার্থাখিলমানসঃ ॥ ১৪৯॥

সর্বভক্তনিরোধাত্মা লীলানন্তনিরোধকৃত্ ।
ভূমিষ্ঠপরমানন্দো দেবকীশুদ্ধিকারণম্ ॥ ১৫০॥

বসুদেবজ্ঞাননিষ্ঠসমজীবনিবারকঃ ।
সর্ববৈরাগ্যকরণস্বলীলাধারশোধকঃ ॥ ১৫১॥

মাযাজ্ঞাপনকর্তা চ শেষসম্ভারসম্ভৃতিঃ ।
ভক্তক্লেশপরিজ্ঞাতা তন্নিবারণতৎপরঃ ॥ ১৫২॥

আবিষ্টবসুদেবাংশো দেবকীগর্ভভূষণম্ ।
পূর্ণতেজোমযঃ পূর্ণঃ কংসাধৃষ্যপ্রতাপবান্ ॥ ১৫৩॥

বিবেকজ্ঞানদাতা চ ব্রহ্মাদ্যখিলসংস্তুতঃ ।
সত্যো জগৎকল্পতরুর্নানারূপবিমোহনঃ ॥ ১৫৪॥

ভক্তিমার্গপ্রতিষ্ঠাতা বিদ্বন্মোহপ্রবর্তকঃ ।
মূলকালগুণদ্রষ্টা নযনানন্দভাজনম্ ॥ ১৫৫॥

বসুদেবসুখাব্ধিশ্চ দেবকীনযনামৃতম্ ।
পিতৃমাতৃস্তুতঃ পূর্বসর্ববৃত্তান্তবোধকঃ ॥ ১৫৬॥

গোকুলাগতিলীলাপ্তবসুদেবকরস্থিতিঃ ।

সর্বেশত্বপ্রকটনো মায়াব্যত্যযকারকঃ ॥ ১৫৭॥

জ্ঞানমোহিতদুষ্টেশঃ প্রপঞ্চাস্মৃতিকারণম্ ।

যশোদানন্দনো নন্দভাগ্যভূগোকুলোৎসবঃ ॥ ১৫৮॥

নন্দপ্রিয়ো নন্দসূনুর্যশোদায়াঃ স্তনন্ধযঃ ।

পূতনাসুপযঃপাতা মুগ্ধভাবাতিসুন্দরঃ ॥ ১৫৯॥

সুন্দরীহৃদযানন্দো গোপীমন্ত্রাভিমন্ত্রিতঃ ।

গোপালাশ্চর্যরসকৃত্ শকটাসুরখণ্ডনঃ ॥ ১৬০॥

নন্দব্রজজনানন্দী নন্দভাগ্যমহোদযঃ ।

তৃণাবর্তবধোৎসাহো যশোদাজ্ঞানবিগ্রহঃ ॥ ১৬১॥

বলভদ্রপ্রিয়ঃ কৃষ্ণঃ সঙ্কর্ষণসহাযবান্ ।

রামানুজো বাসুদেবো গোষ্ঠাঙ্গণগতিপ্রিয়ঃ ॥ ১৬২॥

কিঙ্কিণীরবভাবজ্ঞো বৎসপুচ্ছাবলম্বনঃ ।

নবনীতপ্রিয়ো গোপীমোহসংসারনাশকঃ ॥ ১৬৩॥

গোপবালকভাবজ্ঞশ্চৌর্যবিদ্যাবিশারদঃ ।

মৃৎস্নাভক্ষণলীলাস্যমাহাত্ম্যজ্ঞানদাযকঃ ॥ ১৬৪॥

ধরাদ্রোণপ্রীতিকর্তা দধিভাণ্ডবিভেদনঃ ।

দামোদরো ভক্তবশ্যো যমলার্জুনভঞ্জনঃ ॥ ১৬৫॥

বৃহদ্বনমহাশ্চর্যো বৃন্দাবনগতিপ্রিয়ঃ ।

বৎসঘাতী বালকেলির্বকাসুরনিষূদনঃ ॥ ১৬৬॥

অরণ্যভোক্তাঽপ্যথবা বাললীলাপরায়ণঃ ।

প্রোৎসাহজনকশ্চৈবমঘাসুরনিষূদনঃ ॥ ১৬৭॥

ব্যালমোক্ষপ্রদঃ পুষ্টো ব্রহ্মমোহপ্রবর্ধনঃ ।

অনন্তমূর্তিঃ সর্বাত্মা জঙ্গমস্থাবরাকৃতিঃ ॥ ১৬৮॥

ব্রহ্মমোহনকর্তা চ স্তুত্য আত্মা সদাপ্রিয়ঃ ।

পৌগণ্ডলীলাভিরতির্গোচারণপরায়ণঃ ॥ ১৬৯॥

বৃন্দাবনলতাগুল্মবৃক্ষরূপনিরূপকঃ ।

নাদব্রহ্মপ্রকটনো বয়ঃপ্রতিকৃতিস্বনঃ ॥ ১৭০॥

বর্হিনৃত্যানুকরণো গোপালানুকৃতিস্বনঃ ।

সদাচারপ্রতিষ্ঠাতা বলশ্রমনিরাকৃতিঃ ॥ ১৭১॥

তরুমূলকৃতাশেষতল্পশায়ী সখিস্তুতঃ ।

গোপালসেবিতপদঃ শ্রীলালিতপদাম্বুজঃ ॥ ১৭২॥

গোপসম্প্রার্থিতফলদাননাশিতধেনুকঃ ।
কালীযফণিমাণিক্যরঞ্জিতশ্রীপদাম্বুজঃ ॥ ১৭৩॥

দৃষ্টিসঞ্জীবিতাশেষগোপগোগোপিকাপ্রিযঃ ।
লীলাসম্পীতদাবাগ্নিঃ প্রলম্ববধপণ্ডিতঃ ॥ ১৭৪॥

দাবাগ্ন্যাবৃতগোপালদৃষ্ট্যাচ্ছাদনবহ্নিপঃ ।
বর্ষাশরদ্বিভূতিশ্রীর্গোপীকামপ্রবোধকঃ ॥ ১৭৫॥

গোপীরত্নস্তুতাশেষবেণুবাদ্যবিশারদঃ ।
কাত্যাযনীব্রতব্যাজসর্বভাবাশ্রিতাঙ্গনঃ ॥ ১৭৬॥

সৎসঙ্গতিস্তুতিব্যাজস্তুতবৃন্দাবনাঙ্ঘ্রিপঃ ।
গোপক্ষুচ্ছান্তিসংব্যাজবিপ্রভার্যাপ্রসাদকৃত্ ॥ ১৭৭॥

হেতুপ্রাপ্তেন্দ্রযাগস্বকার্যগোসববোধকঃ ।
শৈলরূপকৃতাশেষরসভোগসুখাবহঃ ॥ ১৭৮॥

লীলাগোবর্ধনোদ্ধারপালিতস্বব্রজপ্রিযঃ ।
গোপস্বচ্ছন্দলীলার্থগর্গবাক্যার্থবোধকঃ ॥ ১৭৯॥

ইন্দ্রধেনুস্তুতিপ্রাপ্তগোবিন্দেন্দ্রাভিধানবান্ ।
ব্রতাদিধর্মসংসক্তনন্দক্লেশবিনাশকঃ ॥ ১৮০॥

নন্দাদিগোপমাত্রেষ্টবৈকুণ্ঠগতিদায়কঃ ।
বেণুবাদস্মরক্ষোভমত্তগোপীবিমুক্তিদঃ ॥ ১৮১॥

সর্বভাবপ্রাপ্তগোপীসুখসংবর্ধনক্ষমঃ ।
গোপীগর্বপ্রণাশার্থতিরোধানসুখপ্রদঃ ॥ ১৮২॥

কৃষ্ণভাবব্যাপ্তবিশ্বগোপীভাবিতবেষধৃক্ ।
রাধাবিশেষসম্ভোগপ্রাপ্তদোষনিবারকঃ ॥ ১৮৩॥

পরমপ্রীতিসঙ্গীতসর্বাদ্ভুতমহাগুণঃ ।
মানাপনোদনাক্রন্দগোপীদৃষ্টিমহোৎসবঃ ॥ ১৮৪॥

গোপিকাব্যাপ্তসর্বাঙ্গঃ স্ত্রীসম্ভাষাবিশারদঃ ।
রাসোৎসবমহাসৌখ্যগোপীসম্ভোগসাগরঃ ॥ ১৮৫॥

জলস্থলরতিব্যাপ্তগোপীদৃষ্ট্যভিপূজিতঃ ।
শাস্ত্রানপেক্ষকামৈকমুক্তিদ্বারবিবর্ধনঃ ॥ ১৮৬॥

সুদর্শনমহাসর্পগ্রস্তনন্দবিমোচকঃ ।

গীতমোহিতগোপীধৃক্ষঙ্খচূড়বিনাশকঃ ॥ ১৮৭॥

গুণসঙ্গীতসন্তুষ্টির্গোপীসংসারবিস্মৃতিঃ ।
অরিষ্টমথনো দৈত্যবুদ্ধিব্যামোহকারকঃ ॥ ১৮৮॥

কেশিঘাতী নারদেষ্টো ব্যোমাসুরবিনাশকঃ ।
অক্রূরভক্তিসংরাদ্ধপাদরেণুমহানিধিঃ ॥ ১৮৯॥

রথাবরোহশুদ্ধাত্মা গোপীমানসহারকঃ ।
হ্রদসন্দর্শিতাশেষবৈকুণ্ঠাক্রূরসংস্তুতঃ ॥ ১৯০॥

মথুরাগমনোৎসাহো মথুরাভাগ্যভাজনম্ ।
মথুরানগরীশোভাদর্শনোৎসুকমানসঃ ॥ ১৯১॥

দুষ্টরঞ্জকঘাতী চ বায়কার্চিতবিগ্রহঃ ।
বস্ত্রমালাসুশোভাঙ্গঃ কুব্জালেপনভূষিতঃ ॥ ১৯২॥

কুব্জাসুরূপকর্তা চ কুব্জারতিবরপ্রদঃ ।
প্রসাদরূপসন্তুষ্টহরকোদণ্ডখণ্ডনঃ ॥ ১৯৩॥

শকলাহতকংসাপ্তধনূরক্ষকসৈনিকঃ ।
জাগ্রৎস্বপ্নভযব্যাপ্তমৃত্যুলক্ষণবোধকঃ ॥ ১৯৪॥

মথুরামল্ল ওজস্বী মল্লযুদ্ধবিশারদঃ ।

সদ্যঃ কুবলযাপীডঘাতী চাণূরমর্দনঃ ॥ ১৯৫॥

লীলাহতমহামল্লঃ শলতোশলঘাতকঃ ।

কংসান্তকো জিতামিত্রো বসুদেববিমোচকঃ ॥ ১৯৬॥

জ্ঞাততত্ত্বপিতৃজ্ঞানমোহনামৃতবাঙ্ময়ঃ ।

উগ্রসেনপ্রতিষ্ঠাতা যাদবাধিবিনাশকঃ ॥ ১৯৭॥

নন্দাদিসান্ত্বনকরো ব্রহ্মচর্যব্রতে স্থিতঃ ।

গুরুশুশ্রূষণপরো বিদ্যাপারমিতেশ্বরঃ ॥ ১৯৮॥

সান্দীপনিমৃতাপত্যদাতা কালান্তকাদিজিত্ ।

গোকুলাশ্বাসনপরো যশোদানন্দপোষকঃ ॥ ১৯৯॥

গোপিকাবিরহব্যাজমনোগতিরতিপ্রদঃ ।

সমোদ্ধবভ্রমরবাক্ গোপিকামোহনাশকঃ ॥ ২০০॥

কুব্জারতিপ্রদোঽক্রূরপবিত্রীকৃতভূগৃহঃ ।

পৃথাদুঃখপ্রণেতা চ পাণ্ডবানাং সুখপ্রদঃ ॥ ২০১॥

দশমস্কন্ধোত্তরার্ধনামানি নিরোধলীলা

জরাসন্ধসমানীতসৈন্যঘাতী বিচারকঃ ।

যবনব্যাপ্তমথুরাজনদত্তকুশস্থলিঃ ॥ ২০২॥

দ্বারকাদ্ভুতনির্মাণবিস্মাপিতসুরাসুরঃ ।

মনুষ্যমাত্রভোগার্থভূম্যানীতেন্দ্রবৈভবঃ ॥ ২০৩॥

যবনব্যাপ্তমথুরানির্গমানন্দবিগ্রহঃ ।

মুচুকুন্দমহাবোধযবনপ্রাণদর্পহা ॥ ২০৪॥

মুচুকুন্দস্তুতাশেষগুণকর্মমহোদযঃ ।

ফলপ্রদানসন্তুষ্টির্জন্মান্তরিতমোক্ষদঃ ॥ ২০৫॥

শিবব্রাহ্মণবাক্যাপ্তজযভীতিবিভাবনঃ ।

প্রবর্ষণপ্রার্থিতাগ্নিদানপুণ্যমহোৎসবঃ ॥ ২০৬॥

রুক্মিণীরমণঃ কামপিতা প্রদ্যুম্নভাবনঃ ।

স্যমন্তকমণিব্যাজপ্রাপ্তজাম্ববতীপতিঃ ॥ ২০৭॥

সত্যভামাপ্রাণপতিঃ কালিন্দীরতিবর্ধনঃ ।

মিত্রবিন্দাপতিঃ সত্যাপতির্বৃষনিষূদনঃ ॥ ২০৮॥

ভদ্রাবাঞ্ছিতভর্তা চ লক্ষ্মণাবরণক্ষমঃ ।

ইন্দ্রাদিপ্রার্থিতবধনরকাসুরসূদনঃ ॥ ২০৯॥

মুরারিঃ পীঠহন্তা চ তাম্রাদিপ্রাণহারকঃ ।

ষোডশস্ত্রীসহস্রেশঃ ছত্রকুণ্ডলদানকৃত্ ॥ ২১০॥

পারিজাতাপহরণো দেবেন্দ্রমদনাশকঃ ।

রুক্মিণীসমসর্বস্ত্রীসাধ্যভোগরতিপ্রদঃ ॥ ২১১॥

রুক্মিণীপরিহাসোক্তিবাক্তিরোধানকারকঃ ।

পুত্রপৌত্রমহাভাগ্যগৃহধর্মপ্রবর্তকঃ ॥ ২১২॥

শম্বরান্তকসৎপুত্রবিবাহহতরুক্মিকঃ ।

উষাপহৃতপৌত্রশ্রীবার্ণবাহুনিবারকঃ ॥ ২১৩॥

শীতজ্বরভযব্যাপ্তজ্বরসংস্তুতষড্গুণঃ ।

শঙ্করপ্রতিযোদ্ধা চ দ্বন্দ্বযুদ্ধবিশারদঃ ॥ ২১৪॥

নৃগপাপপ্রভেত্তা চ ব্রহ্মস্বগুণদোষদৃক্ ।

বিষ্ণুভক্তিবিরোধৈকব্রহ্মস্ববিনিবারকঃ ॥ ২১৫॥

বলভদ্রাহিতগুণো গোকুলপ্রীতিদাযকঃ ।

গোপীস্নেহৈকনিলযো গোপীপ্রাণস্থিতিপ্রদঃ ॥ ২১৬॥

বাক্যাতিগামিযমুনাহলাকর্ষণবৈভবঃ ।

পৌণ্ড্রকত্যাজিতস্পর্ধঃ কাশীরাজবিভেদনঃ ॥ ২১৭॥

কাশীনিদাহকরণঃ শিবভস্মপ্রদাযকঃ ।

দ্বিবিদপ্রাণঘাতী চ কৌরবাখর্বগর্বনুত্ ॥ ২১৮॥

লাঙ্গলাকৃষ্টনগরীসংবিগ্নাখিলনাগরঃ ।

প্রপন্নাভযদঃ সাম্বপ্রাপ্তসন্মানভাজনম্ ॥ ২১৯॥

নারদান্বিষ্টচরণো ভক্তবিক্ষেপনাশকঃ ।

সদাচারৈকনিলযঃ সুধর্মাধ্যাসিতাসনঃ ॥ ২২০॥

জরাসন্ধাবরুদ্ধেন বিজ্ঞাপিতনিজক্লমঃ ।

মন্তরুদ্ধবাদিবাক্যোক্তপ্রকারৈকপরাযণঃ ॥ ২২১॥

রাজসূযাদিমখকৃত্ সম্প্রার্থিতসহাযকৃত্ ।

ইন্দ্রপ্রস্থপ্রযাণার্থমহৎসম্ভারসম্ভৃতিঃ ॥ ২২২॥

জরাসন্ধবধব্যাজমোচিতাশেষভূমিপঃ ।

সন্মার্গবোধকো যজ্ঞক্ষিতিবারণতৎপরঃ ॥ ২২৩॥

শিশুপালহতিব্যাজজযশাপবিমোচকঃ ।

দুর্যোধনাভিমানাব্ধিশোষবাণবৃকোদরঃ॥ ২২৪॥

মহাদেববরপ্রাপ্তপুরশাল্ববিনাশকঃ।

দন্তবক্ত্রবধব্যাজবিজযাঘৌঘনাশকঃ ॥ ২২৫॥

বিদূরথপ্রাণহর্তা ন্যস্তশস্ত্রাস্ত্রবিগ্রহঃ।

উপধর্মবিলিপ্তাঙ্গসূতঘাতী বরপ্রদঃ ॥ ২২৬॥

বল্বলপ্রাণহরণপালিতর্ষিশ্রুতিক্রিযঃ।

সর্বতীর্থাঘনাশার্থতীর্থযাত্রাবিশারদঃ ॥ ২২৭॥

জ্ঞানক্রিযাবিভেদেষ্টফলসাধনতৎপরঃ।

সারথ্যাদিক্রিযাকর্তা ভক্তবশ্যত্ববোধকঃ ॥ ২২৮॥

সুদামারঙ্কভার্যার্থভূম্যানীতেন্দ্রবৈভবঃ।

রবিগ্রহনিমিত্তাপ্তকুরুক্ষেত্রৈকপাবনঃ ॥ ২২৯॥

নৃপগোপীসমস্তস্ত্রীপাবনার্থাখিলক্রিযঃ।

ঋষিমার্গপ্রতিষ্ঠাতা বসুদেবমখক্রিযঃ ॥ ২৩০॥

বসুদেবজ্ঞানদাতা দেবকীপুত্রদাযকঃ।

অর্জুনস্ত্রীপ্রদাতা চ বহুলাশ্বস্বরূপদঃ ॥ ২৩১॥

শ্রুতদেবেষ্টদাতা চ সর্বশ্রুতিনিরূপিতঃ ।

মহাদেবাদ্যতিশ্রেষ্ঠো ভক্তিলক্ষণনির্ণযঃ ॥ ২৩২॥

বৃকগ্রস্তশিবত্রাতা নানাবাক্যবিশারদঃ ।

নরগর্ববিনাশার্থহৃতব্রাহ্মণবালকঃ ॥ ২৩৩॥

লোকালোকপরস্থানস্থিতবালকদাযকঃ ।

দ্বারকাস্থমহাভোগনানাস্ত্রীরতিবর্ধনঃ ॥ ২৩৪॥

মনস্তিরোধানকৃতব্যগ্রস্ত্রীচিত্তভাবিতঃ ।

১১ একাদশস্কন্ধনামানি মুক্তিলীলা

মুক্তিলীলাবিহরণো মৌশলব্যাজসংহৃতিঃ ॥ ২৩৫॥

শ্রীভাগবতধর্মাদিবোধকো ভক্তিনীতিকৃত্ ।

উদ্ধবজ্ঞানদাতা চ পঞ্চবিংশতিধা গুরুঃ ॥ ২৩৬॥

আচারভক্তিমুক্ত্যাদিবক্তা শব্দোদ্ভবস্থিতিঃ ।

হংসো ধর্মপ্রবক্তা চ সনকাদ্যুপদেশকৃত্ ॥ ২৩৭॥

ভক্তিসাধনবক্তা চ যোগসিদ্ধিপ্রদাযকঃ ।

নানাবিভূতিবক্তা চ শুদ্ধধর্মাববোধকঃ ॥ ২৩৮॥

মার্গত্রযবিভেদাত্মা নানাশঙ্কানিবারকঃ ।

ভিক্ষুগীতাপ্রবক্তা চ শুদ্ধসাঙ্খ্যপ্রবর্তকঃ ॥ ২৩৯॥

মনোগুণবিশেষাত্মা জ্ঞাপকোক্তপুরূরবাঃ ।

পূজাবিধিপ্রবক্তা চ সর্বসিদ্ধান্তবোধকঃ ॥ ২৪০॥

লঘুস্বমার্গবক্তা চ স্বস্থানগতিবোধকঃ ।

যাদবাঙ্গোপসংহর্তা সর্বাশ্চর্যগতিক্রিযঃ ॥ ২৪১॥

১২ দ্বাদশস্কন্ধনামানি আশ্রযলীলা

কালধর্মবিভেদার্থবর্ণনাশনতৎপরঃ ।

বুদ্ধো গুপ্তার্থবক্তা চ নানাশাস্ত্রবিধাযকঃ ॥ ২৪২॥

নষ্টধর্মমনুষ্যাদিলক্ষণজ্ঞাপনোৎসুকঃ ।

আশ্রযৈকগতিজ্ঞাতা কল্কিঃ কলিমলাপহঃ ॥ ২৪৩॥

শাস্ত্রবৈরাগ্যসম্বোধো নানাপ্রলযবোধকঃ ।

বিশেষতঃ শুকব্যাজপরীক্ষিজ্জ্ঞানবোধকঃ ॥ ২৪৪॥

শুকেষ্টগতিরূপাত্মা পরীক্ষিদ্দেহমোক্ষদঃ ।

শব্দরূপো নাদরূপো বেদরূপো বিভেদনঃ ॥ ২৪৫॥

ব্যাসঃ শাখাপ্রবক্তা চ পুরাণার্থপ্রবর্তকঃ ।

মার্কণ্ডেযপ্রসন্নাত্মা বটপত্রপুটেশযঃ ॥ ২৪৬॥

মাযাব্যাপ্তমহামোহদুঃখশান্তিপ্রবর্তকঃ ।

মহাদেবস্বরূপশ্চ ভক্তিদাতা কৃপানিধিঃ ॥ ২৪৭॥

আদিত্যান্তর্গতঃ কালঃ দ্বাদশাত্মা সুপূজিতঃ ।

শ্রীভাগবতরূপশ্চ সর্বার্থফলদাযকঃ ॥ ২৪৮॥

মাহাত্ম্যম্

ইতীদং কীর্তনীযস্য হরের্নামসহস্রকম্ ।

পঞ্চসপ্ততিবিস্তীর্ণং পুরাণান্তরভাষিতম্ ॥ ২৪৯॥

য এতৎপ্রাতরুত্থায শ্রদ্ধাবান্ সুসমাহিতঃ ।

জপেদর্থাহিতমতিঃ স গোবিন্দপদং লভেত্ ॥ ২৫০॥

সর্বধর্মবিনির্মুক্তঃ সর্বসাধনবর্জিতঃ ।

এতদ্ধারণমাত্রেণ কৃষ্ণস্য পদবীং ব্রজেত্ ॥ ২৫১॥

হর্যাবেশিতচিত্তেন শ্রীভাগবতসাগরাত্ ।

সমুদ্ধৃতানি নামানি চিন্তামণিনিভানি হি ॥ ২৫২॥

কণ্ঠস্থিতান্যর্থদীপ্ত্যা বাধন্তেঽজ্ঞানজং তমঃ ।

ভক্তিং শ্রীকৃষ্ণদেবস্য সাধযন্তি বিনিশ্চিতম্ ॥ ২৫৩॥

কিম্বহূক্তেন ভগবান্ নামভিঃ স্তুতষড্গুণঃ ।

আত্মভাবং নযত্যাশু ভক্তিং চ কুরুতে দৃঢাম্ ॥ ২৫৪ ॥

যঃ কৃষ্ণভক্তিমিহ বাঞ্ছতি সাধনৌঘৈর্-

নামানি ভাসুরযশাংসি জপেৎস নিত্যম্ ।

তং বৈ হরিঃ স্বপুরুষং কুরুতেঽতিশীঘ্রম্-

আত্মার্পণং সমধিগচ্ছতি ভাবতুষ্টঃ ॥ ২৫৫ ॥

শ্রীকৃষ্ণ কৃষ্ণসখ বৃষ্ণিবৃষাবনিধ্রুগ্-

রাজন্যবংশদহনানপবর্গবীর্য ।

গোবিন্দ গোপবনিতাব্রজভৃত্যগীত

তীর্থশ্রবঃ শ্রবণমঙ্গল পাহি ভৃত্যান্ ॥ ২৫৬॥

॥ ইতি শ্রীভাগবতসারসমুচ্চযে বৈশ্বানরোক্তং

শ্রীবল্লভাচার্যবিরচিতং

শ্রীপুরুষোত্তমসহস্রনামস্তোত্রং সম্পূর্ণম্ ॥

This sahasranAmastotra was composed by Shri Vallabhacharya.

There is a short story narrated on http://sk-pushti.blogspot.com about the composition .

``There is an incident in the life of Shri Gopinathji, elder son of Shri Vallabhacharya, connected with his zeal towards Bhagavata Purana. It was a practice with him, right from his youth, to read Shri Bhagavata Purana regularly. He was so obsessed with its reading that he would not even eat unless he would complete Shri Bhagavata. Very much worried about this adamant attitude of Shri Gopinathji, Shri Vallabhacharya had composed one Stotra (a book praising the greatness) containing one thousand names of Purna Purushottama, all extracted from Shri Bhagavata Purana, and advised his son to read this work daily so that he could have the same complete effect of reading Shri Bhagavata Purana. This Purushottama Sahasranama Stotra, is one of the original works of Shri Vallabhacharya and is much venerated.''

Proofread by Sunderh Hattangadi sunderh at hotmail.com

Please send corrections to sanskrit@cheerful.com

Last updated ত্oday

http://sanskritdocuments.org

% File name : puruShottamasahasranAmastotra.itx
% Category : sahasranAma
% Location : doc_vishhnu
% Language : Sanskrit
% Subject : philosophy/hinduism/religion
% Proofread by : Sunderh Hattangadi sunderh at hotmail.com
% Description-comments :
http://www.parikhparivar.com/CD-1-16-Purushottama%20Nama%20Sahasram.aspx
% Latest update : March 5, 2013
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [ October 13, 2015 ] at Stotram Website